

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## सप्तमकाण्डे चतुर्थः प्रश्नः

### सत्रकर्मनिरूपणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

बृहस्पतिरकामयत श्रन्मे देवा दधीरन् गच्छेयम्पुरोधामिति स एतञ्चतुर्विꣳशतिरात्रमपश्यत्
तमाऽहरत् तेनायजत ततो वै तस्मै श्रद्देवा अदधतागच्छत् पुरोधाँय्य एवँव्विद्वाꣳस श्चतुर्विꣳ-
शतिरात्रमासते श्रदेभ्यो मनुष्या दधते गच्छन्ति पुरोधाञ्ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयँव्वाव
ज्योतिरन्तरिख्षङ्गौरसावायु ॥ [१] ॥ रिमानेव लोकानभ्यारोहन्त्यभि पूर्वन्त्र्यहा भवन्त्यभि-
पूर्वमेव सुवर्गँल्लोकमभ्यारोहन्त्यसत्रँव्वा एतद्यदछन्दोमँय्यच्छन्दोमा भवन्ति तेन सत्रन्देवता
एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यम्पृष्ठानि पशवः छन्दोमा ओजस्येव वीर्ये पशुषु प्रति
तिष्ठन्ति बृहद्रथन्तराभ्याँय्यन्तीयँव्वाव रथन्तरमसौ बृहदाभ्यामेव ॥ [२] ॥ यन्त्यथो अनयो-
रेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गँल्लोकँय्यन्ति चतुर्विꣳशतिरात्रो
भवति चतुर्विꣳशतिरर्द्धमासाः सँव्वथ्सरः सँव्वथ्सरः सुवर्गो लोकः सँव्वथ्सर एव सुवर्गे लोके
प्रति तिष्ठन्त्यथो चतुर्विꣳशत्यख्षरा गायत्री गायत्री ब्रह्मवर्चसङ्गायत्रियैव ब्रह्मवर्चसमव रुन्ध-
तेऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै ॥ [३] ॥

(असावायु राभ्यामेव पञ्चचत्वारिꣳशच्च) ॥ १ ॥

यथा वै मनुष्या एवन्देवा अग्र आसन् तेऽकामयन्तावर्तिम्पाप्मानम्मृत्युमपहत्य दैवीꣳ
सꣳसदङ्गच्छेमेति त एतञ्चतुर्विꣳशतिरात्रमपश्यन् तमाऽहरन् तेनायजन्त ततो वै तेऽव-

तिम्पाप्मानम्मृत्युमपहत्य दैवीꣳ सꣳसदमगच्छन्य एवव्विँद्वाꣳसश्चतुर्विꣳशतिरात्रमासतेऽवर्तिमेव पाप्मानमपहत्य श्रियङ्गच्छन्ति श्रीर्हि मनुष्यस्य ॥ [४] ॥ दैवी सꣳसज्ज्योतिरतिरात्रो भवति सुवर्गस्य लोकस्यानुख्यात्यै पृष्ठ्यः षडहो भवति षड् वा ऋतवः सँव्वथ्सरस्तम्मासा अर्द्धमासा ऋतवः प्रविश्य दैवीꣳ सꣳसदमगच्छन्य एवव्विँद्वाꣳसश्चतुर्विꣳशतिरात्रमासते सँव्वथ्सरमेव प्रविश्य वस्यसीꣳ सꣳसदङ्गच्छन्ति त्रयस्त्रयस्त्रिꣳशा अवस्ताद्भवन्ति त्रयस्त्रयस्त्रिꣳशाः परस्तात् त्रयस्त्रिꣳशैरेवोभयतोऽवर्तिम्पाप्मानमपहत्य दैवीꣳ सꣳसदम्मद्ध्यतो ॥ [५] ॥ गच्छन्ति पृष्ठानि हि दैवी सꣳसज्जामि वा एतत् कुर्वन्ति यत् त्रयस्त्रयस्त्रिꣳशा अन्वञ्चो मद्ध्येऽनिरुक्तो भवति तेनाजाम्यूर्द्ध्वानि पृष्ठानि भवन्त्यूर्द्ध्वाः छन्दोमा उभाभ्याꣳ रूपाभ्याꣳ सुवर्गँल्लोकँय्यन्त्यसत्रव्वाँ एतद्यदछन्दोमँय्यच्छन्दोमा भवन्ति तेन सत्रन्देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यम्पृष्ठानि पशवः ॥ [६] ॥ छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति त्रयस्त्रयस्त्रिꣳशा अवस्ताद्भवन्ति त्रयस्त्रयस्त्रिꣳशाः परस्तान्मद्ध्ये पृष्ठान्युरो वै त्रयस्त्रिꣳशा आत्मा पृष्ठान्यात्मन एव तद्यजमानाः शर्म नह्यन्तेऽनार्त्यै बृहद्रथन्तराभ्यांय्यँन्तीयँव्वाव रथन्तरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव ॥ [७] ॥ सुवर्गँल्लोकँय्यन्ति पराञ्चो वा एते सुवर्गँल्लोकमभ्यारोहन्ति ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ् ख्षडहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर ऋद्ध्वोत् तिष्ठन्ति त्रिवृतोऽधि त्रिवृतमुप यन्ति स्तोमानाꣳ संपत्त्यै प्रभवाय ज्योतिरग्निष्टोमो भवत्ययँव्वाव स ख्षयोऽस्मादेव तेन ख्षयान्न यन्ति चतुर्विꣳशतिरात्रो भवति चतुर्विꣳशतिरर्द्धमासाः सँव्वथ्सरः सँव्वथ्सरः सुवर्गो लोकः सँव्वथ्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो चतुर्विꣳशत्यख्षरा गायत्री गायत्री ब्रह्मवर्चसङ्गायत्रियैव ब्रह्मवर्चसमव रुन्धतेऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै ॥ [८] ॥

(मनुष्यस्य मध्यतः पशव स्ताभ्यामेव सँव्वथ्सर श्चतुर्विꣳशतिश्च) ॥ २ ॥

---

ऋख्षा वा इयमलोमकाऽऽसीथ् साऽकामयतौषधीभिर्वनस्पतिभिः प्र जायेयेति सैतास्त्रिꣳशतꣳ रात्रीरपश्यत् ततो वा इयमोषधीभिर्वनस्पतिभिः प्राजायत ये प्रजाकामाः पशुकामाः

स्युस्त एता आसीरन् प्रैव जायन्ते प्रजया पशुभिरियँव्वा अरूक्षुद्ध्यथ् सैताव्विँराजमपश्यत् तामात्मन् धित्वाऽन्नाद्यमवा रुन्धौषधी ॥ [९] ॥ वनस्पतीन् प्रजाम्पशून् तेनावद्र्धत सा जेमानम्महिमानमगच्छद्य एवव्विँद्वाꣳस एता आसते विराजमेवाऽऽ*त्मन् धित्वाऽन्नाद्यमव रुन्धते वद्र्धन्ते प्रजया पशुभिर्जेमानम्महिमानङ्गच्छन्ति ज्योतिरतिरात्रो भवति सुवर्गस्य लोक-स्यानुख्यात्यै पृष्ठ्यः षडहो भवति षड् वा ऋतवः षट् पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः सँव्वथ्सरन्ते सँव्वथ्सर एव ॥ [१०] ॥ प्रति तिष्ठन्ति त्रयस्त्रिꣳशात् त्रयस्त्रिꣳशमुप यन्ति यज्ञस्य संतत्या अथो प्रजापतिर्वै त्रयस्त्रिꣳशः प्रजापतिमेवाऽऽ*रभन्ते प्रतिष्ठित्यै त्रिणवो भवति विजित्या एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽ*त्मन् दधते त्रिवृदग्निष्टुद्भवति पाप्मा-नमेव तेन निर्दहन्तेऽथो तेजो वै त्रिवृत् तेज एवाऽऽत्मन् दधते पञ्चदश इन्द्रस्तोमो भवतीन्द्रिय-मेवाव ॥ [११] ॥ रुन्धते सप्तदशो भवत्यन्नाद्यस्या वरुद्ध्या अथो प्रैव तेन जायन्त एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽ*त्मन् दधते चतुर्विꣳशो भवति चतुर्विꣳशतिरद्र्धमासाः सँव्वथ्सरः सँव्वथ्सरः सुवर्गो लोकः सँव्वथ्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो एष वै विषूवान् विषूवन्तो भवन्ति य एवव्विँद्वाꣳस एता आसते चतुर्विꣳशात् पृष्ठान्युप यन्ति सँव्वथ्सर एव प्रतिष्ठाय ॥ [१२] ॥ देवता अभ्यारोहन्ति त्रयस्त्रिꣳशात् त्रयस्त्रिꣳशमुप यन्ति त्रयस्त्रिꣳशद्वै देवता देवतास्वेव प्रति तिष्ठन्ति त्रिणवो भवतीमे वै लोकास्त्रिणव एष्वेव लोकेषु प्रति तिष्ठन्ति द्वावेकविꣳशौ भवतः प्रतिष्ठित्या अथो रुचमेवाऽऽ*त्मन् दधते बहवः षोडशिनो भवन्ति तस्मा-द्बहवः प्रजासु वृषाणो यदेते स्तोमा व्यतिषक्ता भवन्ति तस्मादिय मोषधीभिर्वनस्पतिभिर्व्य-तिषक्ता ॥ [१३] ॥ व्यतिषज्यन्ते प्रजया पशुभिर्य एवव्विँद्वाꣳस एता आसतेऽक्लृप्ता वा एते सुवर्गँल्लोकँय्यँन्त्युच्चावचान् हि स्तोमानुपयन्ति यदेत ऊद्र्ध्वाः क्लृप्ताः स्तोमा भवन्ति क्लृप्ता एव सुवर्गँल्लोकँय्यँन्त्युभयोरेभ्यो लोकयोः कल्पते त्रिꣳशदेतास्त्रिꣳशदक्षरा विराडन्नं विराड् विरा-जैवान्नाद्यमव रुन्धतेऽतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै ॥ [१४] ॥

(ओषधीः सँव्वथ्सर एवा ऽव प्रतिष्ठाय व्यतिषक्त्यै कान्नपञ्चाशच्च) ॥ ३ ॥

प्रजापतिः सुवर्गँल्लोकमैत् तन्देवा येनयेन छन्दसाऽनु प्रायुञ्जत तेन नाऽऽ*प्नुवन् त एता द्वात्रिꣳशतꣳ रात्रीरपश्यन् द्वात्रिꣳशदक्षराऽनुष्टुगानुष्टुभः प्रजापतिः स्वेनैव छन्दसा प्रजापति-माप्त्वाऽभ्यारुह्य सुवर्गँल्लोकमायन्य एवंविद्वाꣳस एता आसते द्वात्रिꣳशदेता द्वात्रिꣳशदक्ष-राऽनुष्टुगानुष्टुभः प्रजापतिः स्वेनैव छन्दसा प्रजापतिमाप्त्वा श्रियङ्गच्छन्ति ॥ [१५] ॥ श्रीर्हि मनुष्यस्य सुवर्गो लोको द्वात्रिꣳशदेता द्वात्रिꣳशदक्षराऽनुष्टुग्वागनुष्टुफ् सर्वामेव वाचमाप्नु-वन्ति सर्वे वाचो वदितारो भवन्ति सर्वे हि श्रियङ्गच्छन्ति ज्योतिर्गौरायुरिति त्र्यहा भवन्ती-यँव्वाव ज्योतिरन्तरिक्षङ्गौरसावायुरिमानेव लोकानभ्यारोहन्त्यभिपूर्वन्त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गँल्लोकमभ्यारोहन्ति बृहद्रथन्तराभ्याँय्यँन्ती ॥ [१६] ॥ यँव्वाव रथन्तरमसौ बृहदाभ्या-मेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गँल्लोकँय्यँन्ति पराञ्चो वा एते सुवर्गँल्लोकमभ्यारोहन्ति ये पराचस्त्र्यहानुपयन्ति प्रत्यङ् त्र्यहो भवति प्रत्यव-रूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर् ऋद्ध्वोत् तिष्ठन्ति द्वात्रिꣳशदेतास्तासाँय्या स्त्रिꣳशत् त्रिꣳशदक्षरा विराडन्नँव्विराड् विराजैवाऽन्नाद्यमव रुन्धते ये द्वे अहोरात्रे एव ते उभाभ्याꣳ रूपाभ्याꣳ सुवर्गँल्लोकँय्यँन्त्यतिरात्रावभितो भवतः परिगृहीत्यै ॥ [१७] ॥

(गच्छन्ति यन्ति त्रिꣳशदक्षरा द्वाविꣳशतिश्च) ॥ ४ ॥

द्वे वाव देवसत्रे द्वादशाहश्चैव त्रयस्त्रिꣳशदहश्च य एवंविद्वाꣳसस्त्रयस्त्रिꣳशदहमासते साक्षा-देव देवता अभ्यारोहन्ति यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति यद्यवविध्यति पापीयान् भवति यदि नावविध्यति सदृङ् य एवंविद्वाꣳसस्त्रयस्त्रिꣳ शदहमासते वि पाप्मना भ्रातृव्येणाऽऽ* वर्तन्तेऽहर्भाजो वा एता देवा अग्र आऽहर ॥ [१८] ॥ न्नहरेकोऽभजताह-रेकस्ताभिर्वै ते प्रबाहुगादृध्नुवन्य एवंविद्वाꣳसस्त्रयस्त्रिꣳशदहमासते सर्व एव प्रबाहुगृद्ध्नुवन्ति सर्वे ग्रामणीयम्प्राप्नुवन्ति पञ्चाहा भवन्ति पञ्च वा ऋतवः सँव्वथ्सर ऋतुष्वेव सँव्वथ्सरे प्रति तिष्ठन्त्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धते त्रीण्याश्विनानि भवन्ति त्रय इमे लोका ए ॥ [१९] ॥ ष्वेव लोकेषु प्रति तिष्ठन्त्यथो त्रीणि वै यज्ञस्येन्द्रियाणि तान्येवाव रुन्धते विश्व-जिद्भवत्यन्नाद्यस्या वरुद्ध्यै सर्वपृष्ठो भवति सर्वस्याभिजित्यै वाग्वै द्वादशाहो यत् पुरस्ताद् द्वाद-

शाहमुपेयुरनाप्ताँव्वाचमुपेयुरुपदासुकैषाँव्वाख् स्यादुपरिष्टाद् द्वादशाहमुप यन्त्याप्तामेव वाचमुप यन्ति तस्मादुपरिष्टाद्वाचा वदामोऽवान्तर ॥ [२०] ॥ व्वै दशरात्रेण प्रजापतिः प्रजा असृजत यद्दशरात्रो भवति प्रजा एव तद् यजमानाः सृजन्त एताꣳ ह वा उदङ्कः शौल्बायनः सत्रस्यर्द्धिमुवाच यद् दशरात्रो यद् दशरात्रो भवति सत्रस्यदृध्या अथो यदेव पूर्वेष्वहस्सु विलोम क्रियते तस्यैवैषा शान्तिर्द्व्यनीका वा एता रात्रयो यजमाना विश्वजित्थ् सहातिरात्रेण पूर्वाः षोडश सहातिरात्रेणोत्तराः षोडश य एवव्विद्वाꣳसस्त्रयस्त्रिꣳशदहमासत ऐषान्द्व्यनीका प्रजा जायतेऽतिरात्रावभितो भवतः परिगृहीत्यै ॥ [२१] ॥

(अहर् न्नेष्व वान्तरꣳ षोडश सह सप्तदश च) ॥ ५ ॥

आदित्या अकामयन्त सुवर्गँल्लोकमियामेति ते सुवर्गँल्लोकन्न प्राजानन्न सुवर्गँल्लोकमायन् त एतꣳ षड्त्रिꣳशद्रात्रमपश्यन् तमाऽहरन् तेनायजन्त ततो वै ते सुवर्गँल्लोकम्प्राजानन्थ् सुवर्गँल्लोकमायन्य एवव्विद्वाꣳसः षड्त्रिꣳशद् रात्रमासते सुवर्गमेव लोकम्प्र जानन्ति सुवर्गँल्लोकय्यँन्ति ज्योतिरतिरात्रो ॥ [२२] ॥ भवति ज्योतिरेव पुरस्ताद् दधते सुवर्गस्य लोकस्यानुख्यात्यै षडहा भवन्ति षड् वा ऋतव ऋतुष्वेव प्रति तिष्ठन्ति चत्वारो भवन्ति चतस्रो दिशो दिख्ष्वेव प्रति तिष्ठन्त्यसत्रँव्वा एतद्यदछन्दोमय्यँच्छन्दोमा भवन्ति तेन सत्रन्देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यम्पृष्ठानि पशवः छन्दोमा ओजस्येव ॥ [२३] ॥ वीर्ये पशुषु प्रति तिष्ठन्ति षड्त्रिꣳशद् रात्रो भवति षड्त्रिꣳशदख्षरा बृहती बार्हताः पशवो बृहत्यैव पशूनव रुन्धते बृहती छन्दसाꣳ स्वाराज्यमाश्नुताश्नुवते स्वाराज्यय्यँ एवव्विद्वाꣳसः षड्त्रिꣳशद् रात्रमासते सुवर्गमेव लोकय्यँन्त्यतिरात्रावभितो भवतः सुवर्गस्य लोकस्य परिगृहीत्यै ॥ [२४] ॥

(अतिरात्र ओजस्येव षड्त्रिꣳशाच्च) ॥ ६ ॥

वसिष्ठो हतपुत्रोऽकामयत विन्देय प्रजामभि सादासान् भवेयमिति स एतमेकस्मान्नपञ्चाशमपश्यत् तमाऽहरत् तेनायजत ततो वै सोऽविन्दत प्रजामभि सौदासानभवद्य एवव्विद्वाꣳस एकस्मान्नपञ्चाशमासते विन्दन्ते प्रजामभि भ्रातृव्यान् भवन्ति त्रयस्त्रिवृतोऽग्निष्टोमा भवन्ति वज्रस्यैव

मुखꣳ सꣳ श्यन्ति दश पञ्चदशा भवन्ति पञ्चदशो वज्रो ॥ [२५] ॥ वज्रमेव भ्रातृव्येभ्यः प्र हरन्ति षोडशिमद्दशममहर्भवति वज्र एव वीर्यन्दधति द्वादश सप्तदशा भवन्त्यन्नाद्यस्या वरुद्ध्या अथो प्रैव तैर्जायन्ते पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट् पृष्ठानि पृष्ठैरेवर्तूनन्वारोहन्त्यृतुभिः सँव्वथ्सरन्ते सँव्वथ्सर एव प्रति तिष्ठन्ति द्वादशैकविꣳशा भवन्ति प्रतिष्ठित्या अथो रुचमेवाऽऽ*त्मन् ॥ [२६] ॥ दधते बहवः षोडशिनो भवन्ति विजित्यै षडाश्विनानि भवन्ति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठन्त्यूनातिरिक्ता वा एता रात्रय ऊनास्तद्यदेकस्यै न पञ्चाशदतिरिक्तास्तद्यद्भूयसीरष्टाचत्वारिꣳशत ऊनाच्च खलु वा अतिरिक्ताच्च प्रजापतिः प्राजायत ये प्रजाकामाः पशुकामाः स्युस्त एता आसीरन् प्रैव जायन्ते प्रजया पशुभिर्वैराजो वा एष यज्ञो यदेकस्मान्नपञ्चाशो य एवँव्विद्वाꣳस एकस्मान्नपञ्चाशमासते विराजमेव गच्छन्त्यन्नादा भवन्त्यतिरात्रावभितो भवतोऽन्नाद्यस्य परिगृहीत्यै ॥ [२७] ॥

(वज्र आत्मन् प्रजया द्वाविꣳशतिश्च) ॥ ७ ॥

सँव्वथ्सराय दीक्षिष्यमाणा एकाष्टकायान्दीक्षेरन्नेषा वै सँव्वथ्सरस्य पत्नी यदेकाष्टकैतस्याँव्वा एष एताꣳ रात्रिँव्वसति साक्षादेव सँव्वथ्सरमारभ्य दीक्षन्त आर्तँव्वा एते सँव्वथ्सरस्याभि दीक्षन्ते य एकाष्टकायान्दीक्षन्तेऽन्तनामानावृतू भवतो व्यस्तँव्वा एते सँव्वथ्सरस्याऽभि दीक्षन्ते य एकाष्टकायान्दीक्षन्तेऽन्तनामानावृतू भवतः फल्गुनी पूर्णमासे दीक्षेरन् मुखँव्वा एतथ् ॥ [२८] ॥ सँव्वथ्सरस्य यत् फल्गुनी पूर्णमासो मुखत एव सँव्वथ्सरमारभ्य दीक्षन्ते तस्यैकैव निर्या यथ् साम्मेघ्ये विषूवान्थ् सपंद्यते चित्रापूर्णमासे दीक्षेरन् मुखँव्वा एतथ् सँव्वथ्सरस्य यच्चित्रापूर्णमासो मुखत एव सँव्वथ्सरमारभ्य दीक्षन्ते तस्य न का चन निर्या भवति चतुरहे पुरस्तात् पौर्णमास्यै दीक्षेरन् तेषामेकाष्टकायाङ्क्रयः सम्पद्यते तेनैकाष्टकान्न छम्बट् कुर्वन्ति तेषां ॥ [२९] ॥ पूर्वपक्षे सुत्या सम्पद्यते पूर्वपक्षम्मासा अभि सम्पद्यन्ते ते पूर्वपक्ष उत् तिष्ठन्ति तानुत्तिष्ठत ओषधयो वनस्पतयोऽनूत् तिष्ठन्ति तान् कल्याणी कीर्तिरनूत् तिष्ठत्यराथ् सुरिमे यजमाना इति तदनु सर्वे राद्ध्नुवन्ति ॥ [३०] ॥

(एत च्छबंट्कुर्वन्ति तेषां चतुस्त्रिꣳशाच्च) ॥ ८ ॥

सुवर्गंव्वा एते लोकय्यँन्ति ये सत्रमुपयन्त्यभीन्धत एव दीक्षाभिरात्मानꣳ श्रपयन्त उपसद्भिर्द्वाभ्याल्लोमाव द्यन्ति द्वाभ्यान्त्वचन्द्वाभ्यामसृद् द्वाभ्याम्माꣳसन्द्वाभ्यामस्थि द्वाभ्याम्मज्जानमात्मदक्षिणव्वै सत्रमात्मानमेव दक्षिणान्नीत्वा सुवर्गल्लोकय्यँन्ति शिखामनु प्र वपन्त ऋद्ध्या अथो रघीयाꣳसः सुवर्गल्लोकमयामेति ॥ [३१] ॥

(सुवर्गं पञ्चाशत्) ॥ ९ ॥

ब्रह्मवादिनो वदन्त्यतिरात्रः परमो यज्ञक्रतूनाङ्कस्मात् तम्प्रथममुप यन्तीत्येतद्वा अग्निष्टोमम्प्रथममुप यन्त्यथोक्थ्यमथ षोडशिनमथातिरात्रमनुपूर्वमेवैतद्यज्ञक्रतूनुपेत्य तानालभ्य परिगृह्य सोममेवैतत् पिबन्त आसते ज्योतिष्टोमम्प्रथममुप यन्ति ज्योतिष्टोमो वै स्तोमानाम्मुखम्मुखत एव स्तोमान् प्र युञ्जते ते ॥ [३२] ॥ सꣳस्तुता विराजमभि सम्पद्यन्ते द्वे चर्चावति रिच्येते एकया गौरतिरिक्त एकयाऽऽयुरूनः सुवर्गो वै लोको ज्योतिरूर्ग्विराट्थ्सुवर्गमेव तेन लोकय्यँन्ति रथन्तरन्दिवा भवति रथन्तरं नक्तमित्याहुर्ब्रह्मवादिनः केन तदजामीति सौभरन्तृतीयसवने ब्रह्मसामम्बृहत् तन्मद्ध्यतो दधति विधृत्यै तेनाजामि ॥ [३३] ॥

(त एकान्नपञ्चाशच्च) ॥ १० ॥

ज्योतिष्टोमम्प्रथममुप यन्त्यस्मिन्नेव तेन लोके प्रति तिष्ठन्ति गोष्टोमन्द्वितीयमुप यन्त्यन्तरिक्ष एव तेन प्रति तिष्ठन्त्यायुष्टोमन्तृतीयमुप यन्त्यमुष्मिन्नेव तेन लोके प्रति तिष्ठन्तीयँव्वाव ज्योतिरन्तरिक्षङ्गौरसावायुर्यदेतान्थ्स्तोमानुपयन्त्येष्वेव तल्लोकेषु सत्त्रिणः प्रति तिष्ठन्तो यन्ति ते सꣳस्तुता विराज ॥ [३४] ॥ मभि संपद्यन्ते द्वे चर्चावति रिच्येते एकया गौरतिरिक्त एकयाऽऽयुरूनः सुवर्गो वै लोको ज्योतिरूर्ग्विराडूर्जमेवाव रुन्धते ते न क्षुधाऽऽर्तिमार्च्छन्त्यक्षोधुका भवन्ति क्षुथ् संबाधा इव हि सत्त्रिणोऽग्निष्टोमावभितः प्रधी तावुक्थ्या मद्ध्ये

नभ्यन्तत् तदेतत् परियद्देवचक्रय्यँदेतेन ॥ [३५] ॥ षडहेन यन्ति देवचक्रमेव समारोहन्त्य-
रिष्ट्यै ते स्वस्ति समश्नुवते षडहेन यन्ति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठन्त्युभयतो ज्योतिषा
यन्त्युभयत एव सुवर्गे लोके प्रतितिष्ठन्तो यन्ति द्वौ षडहौ भवतस्तानि द्वादशाहानि सम्पद्यन्ते
द्वादशो वै पुरुषो द्वे सक्थ्यौ द्वौ बाहू आत्मा च शिरश्च चत्वार्यङ्गानि स्तनौ द्वादशौ ॥ [३६] ॥
तत् पुरुषमनु पर्यावर्तन्ते त्रयः षडहा भवन्ति तान्यष्टादशाहानि सम्पद्यन्ते नवान्यानि नवान्यानि
नव वै पुरुषे प्राणास्तत् प्राणाननु पर्यावर्तन्ते चत्वारः षडहा भवन्ति तानि चतुर्विꣳशतिर-
हानि सम्पद्यन्ते चतुर्विꣳशतिरर्धमासाः सँव्वथ्सरस्तथ् सँव्वथ्सरमनु पर्यावर्तन्तेऽप्रतिष्ठितः
सँव्वथ्सर इति खलु वा आहुर्वर्षीयान् प्रतिष्ठाया इत्येतावद्वै सँव्वथ्सरस्य ब्राह्मणय्यँवान्मासो
मासिमास्येव प्रतितिष्ठन्तो यन्ति ॥ [३७] ॥

(विराज मेतेन द्वादशा वेतावद्वा अष्टौ च) ॥ ११ ॥

---

मेषस्त्वा पचतैरवतु लोहितग्रीवः छागैः शल्मलिर्वृद्ध्या पर्णो ब्रह्मणा प्लक्षो मेधेन न्यग्रोध-
श्चमसैरुदुम्बर ऊर्जा गायत्री छन्दोभिस्त्रिवृथ् स्तोमैरवन्तीः स्थावन्तीस्त्वाऽवन्तु प्रियन्त्वा प्रिया-
णाँव्वर्षिष्ठमाप्यानान्निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम ॥ [३८] ॥

(मेषः षट् त्रिꣳशत्) ॥ १२ ॥

---

कूप्याभ्यः स्वाहा कूल्याभ्यः स्वाहा विकर्याभ्यः स्वाहाऽवट्याभ्यः स्वाहा खन्याभ्यः स्वाहा
ह्रद्याभ्यः स्वाहा सूद्याभ्यः स्वाहा सरस्याभ्यः स्वाहा वैशन्तीभ्यः स्वाहा पल्वल्याभ्यः स्वाहा
वर्ष्याभ्यः स्वाहाऽवर्ष्याभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा पृष्वाभ्यः स्वाहा स्यन्दमानाभ्यः स्वाहा
स्थावराभ्यः स्वाहा नादेयीभ्यः स्वाहा सैन्धवीभ्यः स्वाहा समुद्रियाभ्यः स्वाहा सर्वाभ्यः स्वाहा
॥ [३९] ॥

(कूप्याभ्य श्चत्वारिꣳशत्) ॥ १३ ॥

---

अद्भ्यः स्वाहा वहन्तीभ्यः स्वाहा परिवहन्तीभ्यः स्वाहा समन्तँव्वँहन्तीभ्यः स्वाहा शीघ्रँव्वँहन्तीभ्यः स्वाहा शीभँव्वँहन्तीभ्यः स्वाहोग्रँव्वँहन्तीभ्यः स्वाहा भीमँव्वँहन्तीभ्यः स्वाहाऽम्भोभ्यः स्वाहा नभोभ्यः स्वाहा महोभ्यः स्वाहा सर्वस्मै स्वाहा ॥ [४०] ॥

(अद्भ्य एकान्नत्रिꣳशत्) ॥ १४ ॥

---

यो अर्वन्तञ्जिघाꣳसति तमभ्यमीति वरुणः॥ परो मर्तः परः श्वा॥ अहञ्च त्वञ्च वृत्रहन्थ्सम्बभूव सनिभ्य आ। अरातीवा चिदद्रिवोऽनु नौ शूर मꣳसतै भद्रा इन्द्रस्य रातयः॥ अभि क्रत्वेन्द्र भूरध ज्मन्न ते विव्यङ्महिमानꣳ रजाꣳसि। स्वेना हि वृत्रꣳ शवसा जघन्थ न शत्रुरन्तँव्विविदद् युधा ते ॥ [४१] ॥

(विविदद् द्वे च) ॥ १५ ॥

---

नमो राज्ञे नमो वरुणाय नमोऽश्वाय नमः प्रजापतये नमोऽधिपतयेऽधिपतिरस्यधिपतिम्मा कुर्वधिपतिरहम्प्रजानाम्भूयासम्मान्धेहि मयि धेह्युपाकृताय स्वाहाऽऽलब्धाय स्वाहा हुताय स्वाहा ॥ [४२] ॥

(नम एकान्न त्रिꣳशत्) ॥ १६ ॥

---

मयोभूर्वातो अभि वातूस्रा ऊर्जस्वतीरोषधीरा रिशन्ताम्। पीवस्वतीर्जीवधन्याः पिबन्त्ववसाय पद्वते रुद्र मृड॥ याः सरूपा विरूपा एकरूपा यासामग्निरिष्ट्या नामानि वेद। या अङ्गिरसस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म यच्छ॥ या देवेषु तनुवमैरयन्त यासाꣳ सोमो विश्वा रूपाणि वेद। ता अस्मभ्यम्पयसा पिन्वमानाः प्रजावतीरिन्द्र ॥ [४३] ॥ गोष्ठे रिरीहि॥ प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः सँविदानः। शिवाः सतीरुप नो गोष्ठमाऽकस्तासाँव्वयम्प्रजया सꣳ सदेम॥ इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा महीमू षु१ सुत्रामाणं२ ॥ [४४] ॥

(इन्द्रा ष्टात्रिꣳशच्च) ॥ १७ ॥

किꣳ स्विदासीत् पूर्वचित्तिः किꣳ स्विदासीद्बृहद्वयः। किꣳ स्विदासीत् पिशंगिला किꣳ स्विदासीत् पिलिप्पिला॥ द्यौरासीत् पूर्वचित्तिरश्व आसीद् बृहद्वयः। रात्रिरासीत् पिशङ्गि-लाऽविरासीत् पिलिप्पिला॥ कः स्विदेकाकी चरति क उ स्विज्जायते पुनः। किꣳ स्विद्धि-मस्य भेषजङ्किꣳ स्विदावपनम्महत्॥ सूर्य एकाकी चरति ॥ [४५] ॥ चन्द्रमा जायते पुनः। अग्निर्हिमस्य भेषजम्भूमिरावपनम्महत्॥ पृच्छामि त्वा परमन्तम्पृथिव्याः पृच्छामि त्वा भुव-नस्य नाभिम्। पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमव्ँव्योम॥ वेदिमाहुः परमन्तम्पृथिव्या यज्ञमाहु र्भुवनस्य नाभिम्। सोममाहुर्वृष्णो अश्वस्य रेतो ब्रह्मैव वाचः पर-मव्ँव्योम ॥ [४६] ॥

(सूर्य एकाकी चरति षड्चत्वारिꣳशच्च) ॥ १८ ॥

अबें अबांल्यंबिंके न मा नयति कश्चन। ससस्त्यश्वकः॥ सुभगे कांपीलवासिनि सुवर्गे लोके सम्प्रोर्णवाथाम्। आऽहमजानि गर्भधमा त्वमजासि गर्भधम्॥ तौ सह चतुरः पदः सम्प्र सारया-वहै॥ वृषा वाꣳ रेतोधा रेतो दधातूथ् सक्थ्योर्गृदन्धेह्यञ्जिमुदञ्जिमन्वज। यः स्त्रीणाञ्जीवभोजनो य आसां ॥ [४७] ॥ बिलधावनः। प्रियः स्त्रीणामपीच्यः॥ य आसाङ्कृष्णे लक्ष्मणि सर्दिगृदि-म्परावधीत्॥ अबें अबांल्यंबिंके न मा यभति कश्चन। ससस्त्यश्वकः॥ ऊर्ध्वामेनामुच्छ्रयता-द्वेणुभारङ्गिराविव। अथास्या मद्ध्यमेधताꣳ शीते वाते पुनन्निव॥ अबें अबांल्यंबिंके न मा यभति कश्चन। ससस्त्यश्वकः॥ यद्धरिणी यवमत्ति न ॥ [४८] ॥ पुष्टम्पशु मन्यते। शूद्रा यदर्यजारा न पोषाय धनायति॥ अबें अबांल्यंबिंके न मा यभति कश्चन। ससस्त्यश्वकः॥ इयय्ँयका शकु-न्तिकाऽऽहलमिति सर्पति। आहतङ्गभे पसो नि जल्गुलीति धाणिका॥ अबें अबांल्यंबिंके न मा यभति कश्चन। ससस्त्यश्वकः॥ माता च ते पिता च तेऽग्रव्ँवृक्षस्य रोहतः ॥ [४९] ॥ प्र सुलामीति ते पिता गभे मुष्टिमतꣳसयत्॥ दधिक्राव्ण्णो अकारिषञ्जिष्णोरश्वस्य वाजिनः।

सुरभि नो मुखा करत् प्रण आयूꣳषि तारिषत्॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन। महेरणाय चक्षसे॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ। आपो जनयथा च नः ॥ [५०] ॥

(आसा मत्ति न रोहतो जिन्वथ चत्वारि च) ॥ १९ ॥

भूर्भुवः सुवर्वसवस्त्वाऽञ्जन्तु गायत्रेण छन्दसा रुद्रास्त्वाऽञ्जन्तु त्रैष्टुभेन छन्दसाऽऽदित्या-स्त्वाऽञ्जन्तु जागतेन छन्दसा यद्वातो अपो अगमदिन्द्रस्य तनुवम्प्रियाम्। एतꣳ स्तोतरेतेन पथा पुनरश्वमा वर्तयासि नः॥ लाजी(३)ञ्छाची(३)न् यशो ममा(ँ४)। यव्यायै गव्याया एतद्देवा अन्नमत्तैतदन्नमद्धि प्रजापते॥ युञ्जन्ति ब्रध्नमरुषञ्चरन्तम्परि तस्थुषः। रोचन्ते रोचना दिवि॥ युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे। शोणा धृष्णू नृवाहसा॥ केतुङ्कृण्वन्नकेतवे पेशो मर्या अपेशसे। समुषद्भिरजायथाः ॥ [५१] ॥

(ब्रध्नं पञ्चविꣳशतिश्च) ॥ २० ॥

प्राणाय स्वाहा व्यानाय स्वाहाऽपानाय स्वाहा स्नावभ्यः स्वाहा संतानेभ्यः स्वाहा परिसंता-नेभ्यः स्वाहा पर्वभ्यः स्वाहा सधानेभ्यः स्वाहा शरीरेभ्यः स्वाहा यज्ञाय स्वाहा दक्षिणाभ्यः स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा ॥ [५२] ॥

(प्राणाया ष्टाविꣳशतिः) ॥ २१ ॥

सिताय स्वाहाऽसिताय स्वाहाऽभिहिताय स्वाहाऽनभिहिताय स्वाहा युक्ताय स्वाहाऽयुक्ताय स्वाहा सुयुक्ताय स्वाहो द्युक्ताय स्वाहा विमुक्ताय स्वाहा प्रमुक्ताय स्वाहा वञ्चते स्वाहा परिवञ्चते स्वाहा सँव्वञ्चते स्वाहाऽनुवञ्चते स्वाहोद् वञ्चते स्वाहा यते स्वाहा धावते स्वाहा तिष्ठते स्वाहा सर्वस्मै स्वाहा ॥ [५३] ॥

(सिताया ष्टात्रिꣳशत्) ॥ २२ ॥

## समाप्ति कोर्वैः

(बृहस्पतिः श्रद् यथा वा ऋक्षा वै प्रजापतिर्येनयेन द्वे वाव देवसत्रे आदित्या अकामयन्त सुवर्गं वसिष्ठः संवत्सराय सुवर्ग्यं सत्रं ब्रह्मवादिनोऽतिरात्रो ज्योतिष्टोमं मेषः कूप्याभ्यो ऽद्भ्यो यो नमो मयोभूः किꣳ स्विद म्बे भूः प्राणाय सिताय द्वाविꣳशतिः)

(बृहस्पतिः प्रति तिष्ठन्ति वै दशरात्रेण सुवर्गं यो अर्वन्तं भू स्त्रिपञ्चाशत्)

(बृहस्पतिः सर्वस्मै स्वाहा)

॥ हरिः ॐ ॥

सप्तमकाण्डे चतुर्थः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
| --- | --- |
| २२ | ५३ |

ॐ